agasta rachita shrIlakShmI stotra

# શ્રીલક્ષ્મીસ્તોત્રં અગસ્ત્યરચિતમ્

## Document Information

Text title : agastya rachita shrIlakShmI stotra

File name : agastilaxmii.itx

Category : devii, lakShmI, stotra, agastya, devI

Location : doc_devii

Author : agasti

Transliterated by : http://www.webdunia.com

Proofread by : http://www.webdunia.com

Latest update : November 22, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 16, 2023

*sanskritdocuments.org*

agasta rachita shrIlakShmI stotra

# શ્રીલક્ષ્મીસ્તોત્રં અગસ્ત્યરચિતમ્

સંકલન ઃ ડૉ। મનસ્વી શ્રીવિદ્યાલંકાર ‘મનસ્વી’

ઋષિવર અગસ્ત દ્વારા રચિત શ્રીલક્ષ્મી સ્તોત્ર યહ સ્તોત્ર અત્યંત

ફલદાયી હૈ ।

જય પદ્મપલાશાક્ષિ જય ત્વં શ્રીપતિપ્રિયે ।
જય માતર્મહાલક્ષ્મિ સંસારાર્ણવતારિણિ ॥

મહાલક્ષ્મિ નમસ્તુભ્યં નમસ્તુભ્યં સુરેશ્વરિ ।
હરિપ્રિયે નમસ્તુભ્યં નમસ્તુભ્યં દયાનિધે ॥

પદ્માલયે નમસ્તુભ્યં નમસ્તુભ્યં ચ સર્વદે ।
સર્વભૂતહિતાર્થાય વસુવૃષ્ટિં સદા કુરુ ॥

જગન્માતર્નમસ્તુભ્યં નમસ્તુભ્યં દયાનિધે ।
દયાવતિ નમસ્તુભ્યં વિશ્વેશ્વરિ નમોઽસ્તુ તે ॥

નમઃ ક્ષીરાર્ણવસુતે નમસ્ત્રૈલોક્યધારિણિ ।
વસુવૃષ્ટે નમસ્તુભ્યં રક્ષ માં શરણાગતં ॥

રક્ષ ત્વં દેવદેવેશિ દેવદેવસ્ય વલ્લભે ।
દરિદ્રાત્ત્રાહિ માં લક્ષ્મિ કૃપાં કુરુ મમોપરિ ॥

નમસ્ત્રૈલોક્યજનનિ નમસ્ત્રૈલોક્યપાવનિ ।
બ્રહ્માદયો નમસ્તે ત્વાં જગદાનન્દદાયિનિ ॥

વિષ્ણુપ્રિયે નમસ્તુભ્યં નમસ્તુભ્યં જગદ્ધિતે ।
આર્તહન્ત્રિ નમસ્તુભ્યં સમૃદ્ધિં કુરુ મે સદા ॥

અબ્જવાસે નમસ્તુભ્યં ચપલાયૈ નમો નમઃ ।
ચંચલાયૈ નમસ્તુભ્યં લલિતાયૈ નમો નમઃ ॥

નમઃ પ્રદ્યુમ્નજનનિ માતુસ્તુભ્યં નમો નમઃ ।

પરિપાલય ભો માતર્માં તુભ્યં શરણાગતં ॥

શરણ્યે ત્વાં પ્રપન્નોઽસ્મિ કમલે કમલાલયે ।
ત્રાહિ ત્રાહિ મહાલક્ષ્મિ પરિત્રાણપરાયણે ॥

પાણ્ડિત્યં શોભતે નૈવ ન શોભન્તિ ગુણા નરે ।
શીલત્વં નૈવ શોભેત મહાલક્ષ્મિ ત્વયા વિના ॥

તાવદ્વિરાજતે રૂપં તાવચ્છીલં વિરાજતે ।
તાવદ્ગુણા નરાણાં ચ યાવલ્લક્ષ્મીઃ પ્રસીદતિ ॥

લક્ષ્મિત્વયાલંકૃતમાનવા યે પાપૈર્વિમુક્તા નૃપલોકમાન્યાઃ ।
ગુણૈર્વિહીના ગુણિનો ભવન્તિ દુશીલિનઃ શીલવતાં વરિષ્ઠાઃ ॥

લક્ષ્મીર્ભૂષયતે રૂપં લક્ષ્મીર્ભૂષયતે કુલં ।
લક્ષ્મીર્ભૂષયતે વિદ્યાં સર્વાલ્લક્ષ્મીર્વિશિષ્યતે ॥

લક્ષ્મિ ત્વદ્ગુણકીર્તનેન કમલાભૂર્યાત્યલં જિહ્મતાં ।
રુદ્રાદ્યા રવિચન્દ્રદેવપતયો વક્તું ચ નૈવ ક્ષમાઃ ॥

અસ્માભિસ્તવ રૂપલક્ષણગુણાન્વક્તું કથં શક્યતે ।
માતર્માં પરિપાહિ વિશ્વજનનિ કૃત્વા મમેષ્ટં ધ્રુવં ॥

દીનાર્તિભીતં ભવતાપપીડિતં ધનૈર્વિહીનં તવ પાર્શ્વમાગતં ।
કૃપાનિધિત્વાન્મમ લક્ષ્મિ સત્વરં ધનપ્રદાનાદ્ધનનાયકં કુરુ ॥

માં વિલોક્ય જનનિ હરિપ્રિયે । નિર્ધનં ત્વત્સમીપમાગતં ॥

દેહિ મે ઝટિતિ લક્ષ્મિ । કરાગ્રં વસ્ત્રકાંચનવરાન્નમદ્ભુતં ॥

ત્વમેવ જનની લક્ષ્મિ પિતા લક્ષ્મિ ત્વમેવ ચ ॥

ત્રાહિ ત્રાહિ મહાલક્ષ્મિ ત્રાહિ ત્રાહિ સુરેશ્વરિ ।
ત્રાહિ ત્રાહિ જગન્માતર્દરિદ્રાત્ત્રાહિ વેગતઃ ॥

નમસ્તુભ્યં જગદ્ધાત્રિ નમસ્તુભ્યં નમો નમઃ ।
ધર્માધારે નમસ્તુભ્યં નમઃ સમ્પત્તિદાયિની ॥

દરિદ્રાર્ણવમગ્નોઽહં નિમગ્નોઽહં રસાતલે ।
મજ્જન્તં માં કરે ધૃત્વા સૂદ્ધર ત્વં રમે દ્રુતં ॥

કિં લક્ષ્મિ બહુનોક્તેન જલ્પિતેન પુનઃ પુનઃ ।

અન્યન્મે શરણં નાસ્તિ સત્યં સત્યં હરિપ્રિયે ॥

એતચ્શ્રુત્વાઽગસ્તિવાક્યં હૃષ્યમાણ હરિપ્રિયા ।
ઉવાચ મધુરાં વાણીં તુષ્ટાહં તવ સર્વદા ॥

લક્ષ્મીરુવાચ
યત્ત્વયોક્તમિદં સ્તોત્રં યઃ પઠિષ્યતિ માનવઃ ।
શ્ૃણોતિ ચ મહાભાગસ્તસ્યાહં વશવર્તિની ॥

નિત્યં પઠતિ યો ભક્ત્યા ત્વલક્ષ્મીસ્તસ્ય નશ્યતિ ।
રણશ્ચ નશ્યતે તીવ્રં વિયોગં નૈવ પશ્યતિ ॥

યઃ પઠેત્પ્રાતરુત્થાય શ્રદ્ધા-ભક્તિસમન્વિતઃ ।
ગૃહે તસ્ય સદા સ્થાસ્યે નિત્યં શ્રીપતિના સહ ॥

સુખસૌભાગ્યસમ્પન્નો મનસ્વી બુદ્ધિમાન્ ભવેત્ ।
પુત્રવાન્ ગુણવાન્ શ્રેષ્ઠો ભોગભોક્તા ચ માનવઃ ॥

ઇદં સ્તોત્રં મહાપુણ્યં લક્ષ્મ્યગસ્તિપ્રકીર્તિતં ।
વિષ્ણુપ્રસાદજનનં ચતુર્વર્ગફલપ્રદં ॥

રાજદ્વારે જયશ્ચૈવ શત્રોશ્ચૈવ પરાજયઃ ।
ભૂતપ્રેતપિશાચાનાં વ્યાઘ્રાણાં ન ભયં તથા ॥

ન શસ્ત્રાનલતોયૌઘાદ્ભયં તસ્ય પ્રજાયતે ।
દુર્વૃત્તાનાં ચ પાપાનાં બહુહાનિકરં પરં ॥

મન્દુરાકરિશાલાસુ ગવાં ગોષ્ઠે સમાહિતઃ ।
પઠેત્તદ્દોષશાન્ત્યર્થં મહાપાતકનાશનં ॥

સર્વસૌખ્યકરં નૃણામાયુરારોગ્યદં તથા ।
અગસ્ત્રિઆમુનિના પ્રોક્તં પ્રજાનાં હિતકામ્યયા ॥

॥ ઇત્યગસ્તિવિરચિતં લક્ષ્મીસ્તોત્રં સમ્પૂર્ણં ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

*agasta rachita shrIlakShmI stotra*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*